
The Asiatic Society Of Bombay
THIS MANUSCRIPT HAS BEEN ADOPTED FOR
MICROFILMING BY :-
SHREE . P.H . KARANI
Date 17.10.2008

वृत्तरत्नाकरप्रारंभः ॥ग्रंथसंख्या ४५०

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

श्रीगणेशायनमः॥ सर्वेनिर्विघ्नसमाप्तिजन्यंतस्यसंतानंपरंपरा॥ १ वेदार्थाश्चैवशैवशास्त्राणिचेतिद्वंद्वः शिवप्रतिपादकानिशास्त्राणि २ छंदः छंदःप्रतिपादकोग्रंथः॥ लक्ष्यंचतल्लक्षणंचेतितत्पुरुषः॥ नामेतिनाम्नेत्यर्थे॥ बालानामल्पबुद्धीनांसुखेनअप्रयासेनसिद्ध्येयुस्तत्तयेदृत्यर्थः॥ अन्यग्रंथेषुलक्षणमेवास्तिनतुलक्षणलक्ष्यमपिअत्रतदुभयोरपिसत्वादप्रयासेनव्युत्पत्तिरितिभावः॥ वृत्तानिरत्नानीवतेषांआकरंमुख्यस्थानं ३ ग्रंथमूलंलिखतिपिंगलेति॥ पिंगलः सूत्रकारः॥ मात्रावृत्तान्यार्यादीनिवर्णवृत्तानिश्रीप्रभृ

सुखसंतानमिध्यर्थेनत्वाब्रह्माच्युतार्चितं॥ गौरीविनायकोपेतंशंकरंलोकशंकरं १ वेदार्थशैवशास्त्रज्ञः पद्मकोभूद्विजोत्तमः॥ तस्यपुत्रोऽभिकेदारः शिवपादार्चनेरतः २ तेनेदंक्रियतेछंदोलक्ष्यलक्षणसंयुतं॥ वृत्तरत्नाकरंनामबालानांसुखसिद्धये ३ विशेषकं॥ पिंगलादिभिराचार्यैर्यदुक्तंलौकिकंद्विधा॥ मात्रावर्णविभेदेनछंदस्तदिहकथ्यते ४ षडध्यायनिबद्धस्यछंदसोऽस्यपरिस्फुटं॥ प्रमाणमपिविज्ञेयंषट्त्रिंशदधिकंशतं ५ म्यरस्तजन्भनैर्लोतैरेभिर्दशभिरक्षरैः॥ समस्तंवाङ्मयंव्याप्तंत्रैलोक्यमिवविष्णुना ६ सर्वगुर्वीमुरवांतर्लीयरावंतगलासतौ॥ गमध्याद्योऽभौत्रिलोनौष्टौभवंहत्रगणास्त्रिकाः ७ ज्ञेयाःसर्वांतमध्यादिगुरवोत्रचतुष्कलाः॥ गणाश्चतुर्लघूपेताःपंचार्यादिषुसंस्थिताः ८

तानि ४ शतग्रंथगणनायांप्रसिद्धानामनुष्टुपछंदसांश्लोकानामितिशेषः ५ वाङ्मयवाङ्मालं ६ त्रयोवर्णाःपरिमाणमेषांत्रिकाः यद्यपिसूत्रवृत्तालःसमुद्रागणइतिसूत्रेणआर्यादिषुवक्ष्यमाणानांचतुर्मात्राणामेवगणसंज्ञाकृतातथापिमादीनांवर्णसमुदायस्यपत्वाद्गणत्वेनव्यवहारः॥ मयइत्यादयः एकाक्षराःसंज्ञाःधीश्रीरूर्लीमित्यादिसूत्रानुसारात् अकारोच्चारणंतुसुखमुरवार्थं॥ मयरसतजभनलगसेमितमित्यादौयथा॥ म ३।१ य।३। र ३।१ त ३३।३३ ज।३। भ ३॥न॥ सर्वश्चअंतश्चमध्यश्चआदिश्चतेगुरवोयत्रेसूति॥ चत्वारोलघवोयत्रेतिच॰ चतुर्मात्राण्तेनतुत्र्यक्षरात्मकाः तेनसर्वगुरुः द्विगुरुः स ३३ अं॥३३ म।३। आ।३॥ च॥ ॥३॥ आर्यादोव्यवस्थापितानांगणानामुदाहरणं॥ पद्मानितरांविभातिवारिणिवरतनु ॥८ ॥

81/1935

चाह्यंजनानांनोपि॥ नतत्कवांमन्मथविभ्रमोभवदिति ९ १० स्पष्टः ११ पिच्छलानिस्निग्धानि॥ कंदर्पतिकारः॥ ग्राम्येतिसंयुक्तविपरीतग्रः १२ लोकतः शिष्टव्यवहारात्॥ चतुर्थांशःश्लोकस्येतिशेषः॥ विच्छेदः विरामःसंज्ञायस्याः अत्राकुः यतिःसर्वत्रपादांतश्लोकार्द्धेतुविशेषतः॥ समुद्रादिपदांतेचव्यक्ताव्यक्तविभक्तिके १ क्वचित्तुपदमध्येपिसमुद्रादोयतिर्भवेत् यदिद्वयोर्यरोर्भागोनस्यातामेकवर्णकौ २ श्लोकार्द्धेतुविशेषतः॥ इत्यनेनसंधिकार्यमपिनिषिध्यते॥ स्यस्तविभक्तिकमेवचेत्यपरे

सानुस्वारोविसर्गांतोह्रस्वोयुक्तपरश्चयः॥ वापादांतेत्वसौवक्त्रेत्येवान्यामात्रकोलघुः ४ पादादाविहवर्णस्यसंयोगःक्रमसंज्ञकः॥ पुरस्तिनेनतेननस्याल्लघुतापिक्वचिद्गुरोः ५ क्रमस्योदाहरणं॥ तरुणंसर्षपशाकंनवोदनंपिच्छलानिचदधीनि॥ अल्पव्ययेनसुंदरीग्राम्यजनोमिष्टमश्नाति ११ अधिभूतरसादीनांज्ञेयाःसंज्ञास्तल्लोकतः॥ ज्ञेयःपादश्चतुर्थांशोयतिर्विच्छेदसंज्ञिका १२ युक्तमंविषमंचायुक्सुखनंसद्भिर्निगद्यते॥ समंसमार्धसमंवृत्तंविषमंचतथापरं १३ भंघ्रयोयस्यचत्वारस्तत्वलक्षणलक्षिताः॥ तच्छंदःशास्त्रतत्वज्ञाःसमंवृत्तंप्रचक्षते॥ १४ प्रथमांघ्रिसमोयस्यद्वितीयश्चरणोभवेत्॥ द्वितीयस्तुर्यकोवृत्तंतदर्धसममुच्यते १५

अस्यलयुत्वस्यत्यर्थः २ विविशेषः तेनात्रपद्येदोषः॥ देवासुरनरव्यूहनिषेवितसुरापगा॥ विभूषितमहाभोगजटाजूटंशिवंनुमः १ पदमध्ययंतुरुदाहरणं॥ प्रणमतभवबंधक्लेशमथशायनारायणचरणसरोजद्वंद्वमानंदहेतुइति॥ पूर्वापरार्धस्यतरभागस्यैकवर्णकत्वेनदोषएव॥ यथा॥ एतस्याराजातिसुकुमनसांदामकंठावलंबि॥ पूर्वोत्तवत्तरः संधौक्वचिदेवंपरादिवत॥ द्रष्टव्योयतिर्चिंतायांयत्यादेशःपरादिवत॥ पूर्वोत्तवद्यथा॥ जंभारातिभकुंभोद्भवमिवदधतद्त्यादि॥ परादिवद्यथा॥ सप्तर्षिहस्तार्वचितावशेषाण्यधोविवस्वान्परिवर्तमानः॥ १२ युगितसमपादस्यसंज्ञा॥ अयुगितविषमपादस्यसंज्ञा १३ १४ १५

१८ स्पष्टः॥ यस्यपादचतुष्केपिलक्ष्माभिन्नपरस्परं॥ १७ १८ १९ २० २१ स्पष्टः॥ मात्रावृत्तमार्यादितत अनुपूर्वप्रथमंयस्योक्तिर्याथोयथास्थात्तथा २२ गणाः चतुर्मात्रात्मकाः॥ गोपेताः गुरुपेताः॥ इहप्रथमार्द्धे॥ विषमेप्रथमतृतीयपंचमसप्तमास्येविषमस्थाने॥ गुर्वादिवन्मध्यगुरुरूपश्चचतुर्मात्रत्वात्सोपिनोजगणोनभवति॥ समेत्वनियतः॥ अयंजगणषष्ठोदयः नलघूवादेयौ॥ नश्चलघुश्चनस्मिलघुः इतरश्चैकोलघुः इतिचतुर्लघुर्जगणः॥ तथाचजगणचतुर्लघ्वन्यतरएवषष्ठइतिनियमःफलितः नचव्यंजनं

यस्यपादचतुष्केपिलक्ष्माभिन्नपरस्परं॥ तदाकृविषमंवृत्तंछंदःशास्त्रविशारदाः १६ आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्द्धितैः पृथक्छंदोभवेत्संख्यावत्पूर्विंशतिंगतैः १७ तदूर्ध्वंचंडवृष्ट्यादिदंडकाःपरिकीर्तिताः॥ त्रोषंगाथाख्याभिःषड्भिश्चरणैश्चोपलक्षिताः १८ उक्ताद्युक्तातथामध्याप्रतिष्ठान्यासपूर्विका॥ गायत्र्युष्णिगनुष्टुप्बृहतीपंक्तिरेवच १९ त्रिष्टुप्चजगतीचैवतथातिजगतीमता॥ शाक्वरीसातिपूर्वास्यादष्ट्यत्यष्टीततःस्मृते २० धृतिश्चातिधृतिश्चैवकृतिःप्रकृतिरा कृतिः॥ विकृतिःसंस्कृतिश्चैवतथाभिकृतिरुत्कृतिः २१ इत्युक्ताश्छंदसांसंज्ञाः क्रमशोवक्ष्मिसांप्रतं॥ लक्षणंसर्ववृत्तानांमात्रावृत्तानुपूर्वकं २२ इतिश्रीवृत्तरत्नाकरापरनाम्नि छंदसिसंज्ञाविधानोनामप्रथमोध्यायः॥ लक्ष्मेतत्सप्तगणागोपिता भवतिनेहविषमेत्रः॥ षष्ठीयंनलघूवाप्रथमेर्धेनियतमार्यायाः १ षष्ठेहितीयलात्सरकेल्लेमुरवलाच्च॰ सयति॰ यदनियमः॥ चरमेर्द्धेपंचमकेतस्मादिहभवतिषष्ठोलः २

चार्द्धमात्रिकमित्युक्तेव्यंजनद्वयसंयोगस्यमात्रात्मकत्वात्तल्लक्ष्येदृत्यादौमात्राधिक्यातिव्याप्तिवारणमसंगतमितिवाच्यं॥ अत्रमात्राणमेवगणत्वेनव्यंजनसंयोगस्यअतथात्वात्॥ अत्रार्धमेवाधिकृत्यलक्षणाभिधानात्॥ स्वरार्धमार्यार्धमितिपिंगलसूत्राच्च आर्यायांपादव्यवस्थानास्तीतिगम्यते १ अत्रप्रथमेर्धेदृत्यनुवर्तते॥ प्रथमेर्धेषष्ठस्थानेनगणयुक्तेलघौसतिचतुर्लघुसंबंधीयोद्वितीयोलघुः तस्मात्प्रथमे पूर्वस्मिन्प्रथमलघौसयतिसविछेदे २

पदस्यनियमःसमाप्तिर्भवति॥ परकेषष्ठात्परकेसप्तमेल्लेसतिमुरवलादादिलघोः॥ प्रथमेषष्ठगणांतेसविछेदापदसमाप्तिः॥ चरमेर्धेपंचमस्थानेल्लेसतितस्मात्पंचमात्प्रथमेचतुर्थेगणांतेयतिः॥ इहउत्तरार्धेषष्ठगणस्थानापन्नः॥ एकोलघुरवदेयोननुचतुर्मात्रगणः शेषंपूर्वार्धवत् २ यस्याः आर्यायाः त्रिषु अंशकेषुचतुर्मात्रगणेषुपादोयतिः॥ केवलंयतिरुक्तमार्यातोःस्यादेवलक्षण्यं ३ स्पष्टः ४ जकारवर्णभमाषाकरणापगमध्यगावित्यस्यसाफल्यमितिकेचित् ५ शेषउत्तरार्धेपूर्वजलक्ष्माआ

त्रिषुंकेषुपादो॰ दलयोराद्येषुदृश्यतेयस्याः॥ पथ्येतिनामतस्याश्छंदोविद्भिःसमाख्यातं ३ संलंघ्यगणत्रयमादिमं॰ शकलैमो र्द्वयोर्भवतिपादः॥ यस्यास्तांपिंगलनागोविपुलामितिसमाख्याति ४ दलयोर्द्वयोर्जकारौद्वितीयतुर्ययोर्गमध्यगोयस्याः॥ तपलेतिनामतस्याःप्रकीर्तितंनागराजेन ५ आद्यंदलंसमस्तंभजेतलक्ष्मचपलागतंयस्याः॥ शेषपूर्वजलक्ष्मामुखचपला॰ सोदितामुनिना ६ प्राक्प्रतिपादितमर्धेप्रथमेप्रथमेतरेतुचपलायाः॥ लक्ष्माश्रयेतसोक्ताविश्रुद्धधीभेर्जघनजपला ७ इत्यार्याप्रकरणं॥ आर्याप्रथमदलोक्तंयदिकथमपिलक्षणंभवेदुभयोः॥ दलयोःद्रुतयातिशोभां॰ तांगीतिंगीतवान्भुजंगेशः ९ आर्याद्वितीयकर्धं॰ यदुदितंलक्षणंतत्स्यात्॥ यद्यभयोरपिदलयो॰ रूपगीतिंतांमुनिर्ब्रूते २ आर्याशकलाद्वितयं॰ व्यत्ययराचितंभवेद्यस्याः॥ सोद्गीतिःकिलगदिता तद्द्वयंशभेदसयुक्ता ३ आर्यापूर्वार्धंयदि॰ गुरुणैकेनाधिकेननिधनेयुक्तं॥ इतरत्तद्वन्निखिलं॰ यदीयमुदिताकिलेयमार्यागीतिः ४ इतिगीतिप्रकरणं॥

ऐतरार्धेसामान्यलक्षणा ६ ७ स्पष्टः॥ कथमपिप्रागुक्तषष्ठोयंनलघूवेतिपक्षयोरन्यतरपक्षेणापीत्यर्थः॥ केचित्तुपथ्याविपुलाद्यन्यतमप्रकारेणेत्याहुः॥ तदाख्यातिभिः॥ यथोक्तलक्षणीयविरामैः॥ शोभायस्यास्तां १ २ स्पष्टः॥ यतेः अंशभेदाः विश्रामभागाः तैःसंयुक्ता॥ तद्वत्स्यात्आर्यावत् ३ निधनेभंते॥ इतरत् उत्तरार्द्धं निखिलंतद्वत्पूर्वार्धवत् द्वात्रिंशन्मात्रायुक्तमित्यर्थः ४ रामराम

समपादे अष्टौकलाः मात्राः देयाः ताः मात्राः निरंतराः लघुद्वयाद्यवनदेयाः किंतुगुरुभिश्रिताः ॥ अत्र आरूमात्रासुमध्येसमाद्वितीयादि
कपराश्रितातृतीयाद्याश्रिता ॥ नकर्तव्या ॥ द्वितीयातृतीययोः स्थानेएकोगुरुर्नदेयइत्यर्थः ॥ एवंषष्ठीसप्तम्योः चतुर्थीपंचम्योश्च
१ पर्यंतेअवसानेशेषंतथैववेतालीयवदेव २ विषमेषट्मात्राः समेष्टौइत्यादिपूर्ववत् ॥ इयांस्तुविशेषः ॥ तासामंतेभगणोद्वौगु
रुश्चदेयौ ३ द्वितीयलः द्वितीयमात्रातृतीययुक्तृतीयमात्रायुक्तास्यात् ॥ प्रथमोलघुः द्वितीयोगुरुरेवेत्यर्थः ४ ५ ६ स्पष्टौ

षड्विषमेष्टौसमेकलास्ताश्चसमेस्युर्नोनिरंतराः ॥ सेनेमात्रपराश्रिताकलावेतालीयेतेरलोगुरुः १ पर्यंतेयोंतथैवशेषंत्यो
पछंदसिकंस्कंधीभिरुक्तं ॥ २ आपातालिकाकथितेयंभाद्गुरुकावश्यपूर्ववदन्यत् ३ तृतीययुग्दक्षिणांतिकासमस्त
पादेद्वितीयलः ४ उदीच्यवृत्तिर्द्वितीयलः सक्तोयेणभवेद्युग्मयोः ५ पूर्वेणयुतोथपंचमः प्राच्यवृत्तिरुदितेति
युग्मयोः ६ यदासमावोजयुग्मकौपूर्वयोर्भवतितत्प्रयुक्तकं ॥ ७ अस्ययुग्मस्यरचितापरांतिका ८ अयुग्मवा
पारुहासिनी ९ इतिवेतालीयप्रकरणं वक्त्रंनाद्यास्रसोस्यातामध्येयेनिष्ठुभिरव्यातं १ युजोर्जनसरिद्भुवः
पथ्यावक्त्रंप्रकीर्तितं २ ओजयोर्जनवारिधेस्तदेवविपरीतादि ३

पूर्वयोरुदीच्यवृत्तिप्राच्यवृत्त्योः समोसदृशो
ओजयुग्मकोविषमसमपादोविषमपादः उदीच्यवृत्तेः समपादः प्राच्यवृत्तेरितियथासंख्येनान्वयः ७ अस्यप्रवृत्त
कस्यसमपादेः चतुर्भिरपिरचिता ८ प्रवृत्तकस्यविषमपादरचिता ९ ॥ अनुष्टुभिपादस्याद्यादक्षरादग्रेनगण
सगणोनदेयौ ॥ अन्येषट्गणायथेच्छंदेयाः अंत्येश्चतुर्थाक्षरादग्रेतुयगणोदेयः ॥ तद्वक्त्रंनामछंदः १ वक्त्रमेवसमपा
दयोः चतुर्थाक्षरादग्रेजगणेनयुक्तंसत्पथ्यावक्त्रंभवति २ वक्त्रप्रकरणेशेषंवक्त्रवत्ज्ञेयं ॥ विपरीतादिविपरीतप ३
थ्यावक्त्रंनाम ३

85/198

४ ५ स्पष्टौ ॥ चतुर्षापिपादेषुयत्रसप्तमोलघुः साविपुलेतिसेतवस्यआचार्यस्यमतमित्यर्थः अन्यदपिलक्षणंकुत्रचिदुक्तं
स्यात्सप्तमीयत्रलघुश्चतुर्षुचरणेषुच ॥ विपुलोक्तमतिभिः सेतवस्यमतेनेति ६ ६ ७ ८ ९ एषुचतुर्षुवृत्तेषुच
तुर्थाक्षरादग्रेचतुर्षापिपादेषुभरतनगणाः स्युश्चेत्तत्रमेणमविपुलारविपुलानविपुलातविपुलास्युः १० मसजगणयुक्ता
स्त्रमेणमविपुलासविपुलाजविपुलाः स्युरितिकेचित् ॥ द्वावेवहिकौ ॥ इयंचगीत्यार्यातिपिंगलः अत्रप्रकरणेएकस्यलक्ष

चपलावक्त्रमयुजोर्नकारश्चेत्सयोराशीः ॥ ४ ॥ यस्यांत्यसप्तमीयुग्मेसायुग्मविपुलामता ५ सेतवस्यारिविलेष
पि ६ मेनाब्धितोमाद्विपुला ७ इत्थमन्याश्चेरंतुर्थात् ७ नोंबुधेश्चेन्नविपुला ८ तोब्धेस्तत्पूर्वान्याभ
वेत् ९ अंभोनिधेर्मस्तपूर्वा १० इतिवक्त्रप्रकरणं ॥ छ द्विकगुणितवसुलघुरचलधृतिरिति १ मात्रास
मकनवमोल्लातं २ जोन्लावथांबुधेर्विश्लोकः ३ तद्युगलाद्वानवामिकास्यात् ४ वाणाष्टनवसुयदिल
श्चित्रा ५ अष्टम्योभाक्षाउपचित्रा ६ यदतीतंतद्भवतिविधलक्ष्मयुतेमात्रासमादिपादैः कलितम् ॥ अनियतवृ
त्तपरिमाणसाहितंप्रथितंजगत्स्कंधादाकुलकं ७ इतिमात्रासमप्रकरणं ॥

णमुक्तंतदेवान्येषांत्रयाणांबोध्यं ॥ इद
मेवमात्रासमप्रकरणमुच्यते ॥ सर्वपादेषुमात्राणांसमत्वात् १ अत्रअधिकारसमाप्तिपर्यंतंषोडशमात्राः अनुसंधेयाः
यत्रनवमीमात्रालघुरेवअंतिमोवर्णोगुरुरेवशेषेत्वनियमः तन्मात्रासमकंनाम २ अंबुधेश्चेत्तुर्मात्रातः जः अथवा
ल्लोल्लपक्षेलक्षणरचनेत्थं ॥ जोल्लावथजलधेर्विश्लोकः ३ अंबुधेर्युगलाद्दृष्टमात्रातः जः ल्लोवा ॥ ल्लपक्षेतुवान
वामिकाजलधियुगात्त्यादितिलक्षणं ४ ५ स्पष्टः ॥ उपचित्रानवमेपरयुक्ते ॥ अष्टाभ्योगत्यावुपचित्रा ॥ नवमेभवतिगु
रावुपचित्रेतिपाठः ६ अतीतेषुमात्रासमकादिषुहृतंअतीतहृतं ॥ अनियतवृत्तपरिमाणसहितमित्यस्यायमर्थः मात्रास
मकादीनांपंचानामपिमध्येयेकेचिदपिचतुर्भिःपादैरचितं ७

वृत्तस्थलाः मात्राः वर्णविनावृत्तस्थाक्षरैररहिताः संयोगाः गुरवोभवंति ॥ तथागुरुभिर्विनामात्राः वर्णाः वृत्ताक्षराणि भवंति ॥ तथामात्रासंख्या वृत्तस्थलघ्वक्षरसंख्यारहितायाभवति ॥ तस्याः दलेऽर्द्धवृत्तेसतियासंख्यापर्यवस्यतितत्संख्याकाः गुरवोभवंति ॥ इतिप्रकारेणगुरु लघ्वक्षराणांप्रमाणंनिश्चितंभवति ॥ अस्यायमुपयोगः यदिकश्चित्पृच्छति अस्मिन्वृत्तेदयस्रोमात्राः दृश्यंति चाक्षराणिसंतिनद्द स्मिन्वृत्तेद्वौतिगुरवस्संति ॥ अथवाद्यस्रोमात्राः दृश्यंतश्चगुरवोवर्ततेतदाकत्यक्षराणि ॥ वाद्यस्रोमात्राः दृश्यंतश्चलघवः तदाकतिगु

वृत्तस्थलाविनावर्णैर्गावर्णागुरुभिस्तथा ॥ गुरवोलैर्दलेनित्यंप्रमाणमितिश्चिदं ॥ १ ॥शिखिगुणितदशलघुरचितमपगत लघुयुगलमपरमिदमखिलं ॥ सगुरुशकलयुगलकमपिसुपरिघटितललितपदवितति भवतिशिखा २ विनिमयविहित शकलयुगललघुललितपदविततिरचितगुणनिचया ॥ श्रुतिमुखवदिदमपिजगतिजशिरउपवातवतिजिसतिभवति खजा ३ अष्टावर्धेगद्यंभ्यस्तायस्याः सानंगक्रीडोक्ता ॥ दलमपरमपिवसुगुणितमलिलनिधिलघुकविरचितप दवितति भवति ४ त्रिगुणनवलघुरवसितिगुरुरिति ॥ दलयुगलकृतनतनुरतिरुचिरा ५ इतिश्रीवृत्तरत्नाकरव्याख्यायांछंद सिद्वितीयोध्यायः ॥ उक्तौयां १ गश्रीः १ अत्युक्तायां २ गोस्त्री २ मध्यायां ३ मोनारी ३ रोमृगी ४ प्रतिष्ठा यां ४ म्लोचेत्कन्यां ५ सुप्रतिष्ठायां ५ भोगितिपंक्तिः ६ गायत्र्यां ७ ल्योस्तस्तनुमध्या ७ शशिवदनान्यो

एकाक्षरपादे छंदसीत्यर्थः

रवदृतितदेववाच्यं ॥ १ कुत्रचिदन्यत्र ॥ द्विगुणाक्षरपिंडेषुमात्रासंख्याविवर्जने ॥ लघूनांजायतेसंख्या पूर्वेषेषविधिस्तथा २ अयमर्थः ॥ पूर्वार्धेअष्टाविंशतिलघवोंतेगुरुश्च ॥ उत्तरार्धेत्रिंशल्लघवोंतेगुरुश्च २ विनिमयोव्यत्ययः ॥ जिअकारेवस तेत्यत्र तस्यशिरः प्रान्देशः तमुपगतवतिप्राप्तवतिशिरोवेव ॥ वज्रानामकछंदोभवतीत्यर्थः २ पूर्वार्धेषोडशगुरवः ॥ उत्तरा र्धेद्वात्रिंशल्लघवः सानंगक्रीडा ४ अवसितिः अंतः ॥ सप्तविंशतिर्लघवः ॥ अंतचैकोगुरुः ॥ एतादृशंदृश्यंयस्याः सातिरुचि रानाम ५ यस्याः एकगुरुपः पादः साश्रीर्नाम ॥ १

87/1935

म्लोचेद्वसुमती ९ यत्रोसोमराजी १० स्यान्म्लोसोमकुलं ११ कमलतिकाभ्यो १२ विद्युल्लेस्वासोमः १ स्याद्रोरुक्मविणी १ उष्णिहि ७ मध्यमतिननगाः १३ मध्यमतीनभगाइतिक्वचित्पाठः कुमारललिताज्सोग् १४ सरसेहंसमाला १५ स्सोगः स्यान्मदलेखा १६ चूडामणिस्तभगाः १७ अनुष्टुभि ८ सोमौगोगोविद्युन्माला १८ नोगीतिचित्रपादागः १९ माणवकंमा नलगाः २० म्लोगोहंसवृतमेतत् २१ जौसमानिकागलोच २२ प्रमाणिकाजरोलगो २३ विलासनाम्यांयदन्यत् २४ नाराचिकातरोलगो २५ जौगगोचमिहस्लेखा २६ बृहत्यां ९ राजसाविबृहद्बलमुखा २७ भुजगशिशुभृतानोमः २८ मद्रिकासबतिरानरौ २९ पंक्तौ ॥ म्लोजौ शकुविराडिदंसममतम् ३० म्लोयोचेतिपद्यवनामेदं ३१ म्भोसगयुक्तोरु कन्यवतीयं ३२ जौगगोमयूरसारिणीस्यात् ३३ दीपकमालाचेद्भोजगौ ३४ ज्ञेयाहंसीमभनगयुता ॥ पंचकमालाचेद्भ समाद्वः १ स्लोजौगुरुणेयमुपस्थिता २ ३५ ज्ञेयामत्तामभसगयुक्ता ३६ नरजगैर्भवेन्मनोरमा ३७ त्रिष्टुभि ११ तजोजौगुरुणेयमुपस्थितोक्तौ ३८ स्यादिंद्रवज्रायदितौजगौगः ३९ उपेंद्रवज्राजतजास्ततोगौ ४० अनंतरौदीरितलक्ष्मभाजौ ॥ पादोयदीयाउपजातयस्ताः ॥ दृष्टांतिलान्यास्वपिमिश्रितासुस्मरंतिजातिष्विदमेवनाम ४१ एकत्रपादे चरणद्वयेवापदत्रयेवान्यतरस्थितश्चेत् ॥ तेयोरिहान्यत्रतथोहनीयाश्चतुर्दशोक्ताउपजातिभेदाः ४२ नतजलगैर्गदि तामुरवी ४३ विध्यंगमालाभवेत्तोतगौगः ४४ दोधवृत्तमिदंसमभाद्वौ ४५ शालिन्युक्तास्तोतगौगोधिलोकैः ॥ ४६ म्लौल्लोगः स्याद्भुजगविलसितं ४७ मौक्तिकमालाभतनगगाश्चेत् ४८ वातोर्मीयंगदितम्भौतगौगः ४९ पंचरसैः ॥

म्लोजौगोचेतिपद्य वनामकमितिपाठः२

आभ्यांसमानिकाप्रमाणिकाभ्यांअन्यद्वितानंनाम ॥ आभ्यामित्युपलक्षणं ॥ विद्युन्मालादंदशूकविलेभ्योयदातिरि क्तमनुष्टुवृत्तंतदेववितानंबोध्यं १० पं० अनंतरौदीरितेंद्रवज्रोपेंद्रवज्रे ॥ दृष्टंदंदशूकेंद्रवज्रोपेंद्रवज्रावदन्यत्रापिवीक्ष्यमाणास्वजा तिषुपरस्परंमिश्रितासतीषुइदमेवउपजातिरित्येवनामवदंति ५ तयोःइंद्रवज्रोपेंद्रवज्रयोः अन्यतरः अन्यतरोभेदः ३ मौ क्तिकमालायादिमतनाद्गौइतिक्वचित्पाठः १

वृत्त० क० ५

श्रीर्भतनगंगोस्यात् ५० सांद्रपदंस्याद्भतनगलेश्च ५१ रोनराविहरथोद्धतालगेो ५२ स्वागतेतिरवभाङ्कयुग्मं ५३ प्रि
यवंदितमिदंजोतोगुद्धचे ५४ ननसगगुरुरचिताद्धत्ता ५५ ननरलगुरुभिश्चभद्रिका ५६ श्येनिकारजोरलोगुरु
र्यदा ५७ उपस्थितमिदंजोताङ्कोरो॥ मभ०भोल्लोगः स्यात्भ्रमरविलसिता ५८ जगत्याम् ९२ चंद्रवर्त्मगदितंतु
नभसैः ५९ जतोतुवंशस्थमुदीरितंजरो ६ स्यादिंद्रवंशाततजैरसंयुतैः ६१ द्रुतोटकंबुधिसैःप्रथितं ६२
द्रुतविलंबितमाहनभौभरो ६३ चतुर्भुजगणंवदमौक्तिकदाम ६४ बसयुगविरतिर्नाम्योपुटोयम् ६५ प्रमुदितं
वदनाभवेन्नोरसौ ६६ स्वशरविरतिर्ननोगोप्रभा ६७ नयसहितोन्योकुरुभविचित्रा ६८ वरतनुरनुजोजरोभवेत्
नयुगरमुगयुक्कचगोरीमता ९ लालिमभिहितंनोम्नोनामतः २ द्रुतपदंनभनयराचितंस्यात् ६९ रसैर्जसजसाज्जलो
द्धतगतिः ७० भुजंगप्रयातंभवेद्यश्चतुर्भिः ७१ यश्चतुर्भिर्युतास्त्रिंशदर्णासंमता ७२ भुविभवेन्नभजैरैः प्रियंव
दा ७३ योत्साविहानिर्दिष्टापुष्पविचित्रा ७४ स्योन्योमणिमालाछिन्नागुहवक्त्रैः ७५ धीरैरभाणिलालितातनौ
जरो ७६ प्रमिताक्षरासजसैरुदिता ७७ ननभरसहिताभिहितोज्वला ७८ पंचाश्वैश्छिन्नावेश्वदेवामसोयो
७९ अश्व्यंगैः स्याज्जलधरमालाम्भोम्भो ८० दहनवमालिनीनजपरोभ्यो ८१ भवतिनजावथमालतीजरो
८२ पंचमुनिभिर्मासास्त्रयुताललना ८३ जैरो जैरोवदंतिपंचचामरम् ८४ द्रुहवदतामरसंनजजायः ८५
भातिजगत्यां ९३ तुरंगैरसयतिर्नोततौगः क्षमा ८६ म्तोजोगस्त्रिदशयतिःप्रहर्षिणीयम् यमोरोविरमा
साचंचरिकावलीगः १ उपस्थितमिदंजोतोयदिगुरुः स्यात् २ ८७ चतुर्थयेहरिरुचिजभास्त्रगाः८८

जतोजरोऽष्टद्रुविरादिदंमतमितिपाठः ९१ जजाविरितिमौक्तिकदामजोचेतिपाठः ९० गुहःषडानन: ६ अश्व्यंगैश्चतु
र्भिः अष्टाभिश्चजातिः ४ जसौजरोरामतवंसंतचामरमितिपाठः ३ तुरगसयतिर्नोजतौगः क्षमेतिपाठः २

89/1935

ननतरगुरुभिश्चंद्रिकाश्चषड्भिरितिपाठः १ द्वयंशशिकलेवयद्भिर्नवभिश्चयतियुक्तास्यात्तदास्त्रगितिनाम ९ अत्रस

वेदैरब्धैर्नोयसगामत्तमयूरम् ८९ सजसाजगोभवतिमंजुभाषिणी ९० नैनैतरगुरुभिश्चंद्रिकाचतुर्भिः ९१ जतोसजो
गोभवतिमंजुहासिनी ९२ द्रुहनंदिनीसजससैर्गुरुयुक्तैः ९३ कुटिलगतिर्नजोसजसास्त्रिसोगुरुः ९४ भवतिमृगेंद्र
सुरवंनजोजरोगः ९५ शङ्खौ ९६ म्तोन्योगावक्षग्रहविरतिरसंबधा ९८ ननरसलघ्वगैःस्वरैरपराजिता ९७
ननभनलगतिप्रहरणकलिका ९९ उक्तावसंततिलकातभजाजगोगः ९९ सिंहोद्धतेयमुदितामुनिकाश्यपेन १००
उद्धर्षिणीतिगदिताकिलसेतवेन १०१ नागेनसेवगवितामधुमाधवीति १०२ सजसाग्लगाश्ववसुधाचपं
चयतिः १०३ मजसैनचेवयलगेनपथ्यामता १०४ दंडवदनाभजसैनैःसगुरुयुग्मैः १०५ द्विसप्तछिदलीलाम्भो
म्भोगोचरणचेत् १०६ युगदिग्भिः कुटिलमितिमतंम्भोन्योगो १०७ नजभजलायुताधृतिरियंकथिता १०८
म्भोन्योम्भोचेद्भवतिजगतिचंद्रोतसः ११ म्भोन्योगोचेत्तलधिदशाचहंसश्येनी १०९० भातिशाङ्कयी॥ १५
द्विहतहयैलघ्वरथगीतिशशिकला १११ स्त्रीगीतिभवतिरसनवकयतिरियम् ११२ वैसैर्हययतिरिहमणिगुणनि
करः ११३ ननमययुतेयंमालिनीभोगीलोकैः ११४ भवतिनजोभजोरसहितोप्रभद्रकम् ११५ सजनानयो
चशरदृशायतिरिहेला ११६ म्तोम्योयांतोभवेतांसप्ताष्टभिश्चंद्रलेखा ११७ माब्राणयस्यांसाकामक्रीडा
संज्ञाज्ञातव्या ११८ नजभजैरेविराजितमिदंस्फुरकेसरम् ११९ सगणैः शिवक्रमितेर्गदितानालिनी १२०
भवतःसजोससयुतोधृषभस्ततोयः १२१ चंद्रकांताभिधारोम्योयोविरामःस्वराष्टौ १२२ नानाभद्रितयैरुरु
दितंरमणीयकं १२३

नभिः अष्टभिश्चयतिः ८ अष्टभिश्चसप्ताभिश्चयतोशशिकलेव ६ मणिगुणनिकरइ
तिनाम ९

गुहः स्कंदः तस्यकानिशिरांसि ८ एतादृशायतिश्चेन्नर्कुटकमेवकोकिलकंभवति ८ मात्सोजोभरसंयुतोकरिबाण

॥ रुदितरमणीयकं १२३ ननतभरङ्कताष्टस्वैरुपमालिनी १२४ अष्ट्यां १६ भ्राविनेगैः स्वरात्स्वमृषभगजविलसितं १२५ नजभजरैः सदाभवतिवाणिनीगयुक्तैः १२६ नजरभमनगैनचस्यान्मणिकल्यलता १२७ पंचभकारङ्कताश्वगतिर्यदिचांतगुरुः १२८ लघुगुरुनिरंतरंयदासपंचचामरः १२९ अत्यष्ट्यां ९७ स्सैरुद्रैश्छिन्नायमनसभलागः शिखरिणी १३० जसोजसयलावस्कयहयस्सिश्वपृथ्वीगुरुः १३१ दिङ्नखनिवंशपत्रपतितंभरनभनलगैः १३२ रसयुगहयैर्न्नौम्रोस्लोगोयदाहरिणीतदा १३३ मंदाक्रांताजलधिषडगैर्म्भौनतोतादुरुचेत १३४ यदिभवतोनजौ भजलासगुनर्कुटकं १३५ मुनिगुहकार्णवैः कृतयतिर्वदकोकिलकं १३६ ससजैरतिशायिनीमताभजपरेगुरुभ्यां १३७ धृतौ १८ स्याद्धृतर्त्वश्वैः कुरुक्रमितलसाबेल्लितास्तोनयोयौ १३८ रुधातर्कैस्तर्कैर्भवतिरसतुभिर्यौमोन सतसा १३९ दशावस्कविरतिर्नभौरेश्वतुर्भिर्युतालालसी १४० व्यधिकदशयतिर्नभौरोभवेतांररोतारका १४१ भवतिनयुगलंनभौरोदशाभिर्गजैर्द्रेलता १४२ तद्धृतर्त्वश्वैर्मोम्भौविरतिश्चेत्सिंहाविस्फूर्जितंयोमान्सोजोभरसं युतोकरिबाणरवैर्हरिणप्लुतं १ यदिचनयुगलंततोवेदरेफैर्महामालिका २ पंचभकारङ्कताश्वगतिर्यदिचांत सनिरता ३ १४३ सौजजोभरसंयुतोकरिबाणरवैर्हरनर्तनं १४४ अतिधृतौ ९९ रसर्त्वश्वैर्य्यौन्यौररगुरु युतामेघविस्फूर्जितास्यात् १४५ सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम् १४६ नजभयभाजगोचर चनामुन्यर्कयतिरत्रसा १४७

रवैर्हरिणप्लुतं ४ यदिचनयुगलंततोवेदरेफैर्महामालिका ३ पंचभकारङ्कताश्व गतिर्यदिचांतसनिरता ३ नजभयसाजगोचरचनाश्रलिककुड्डिरत्रसेतिपाठः १

लालित्यंभुजगेंद्रेणभाषितमेतच्चेन्मसस्तजनगुभिरितिपाठः~ नाम्नाचंदवृष्टिप्रयातः दंडकाभवेदित्यर्थः॥दंडकानामपिस

र्भौजतोतोसगुरुकोयदादियहच्छेदभाग्वल्लकी १४८ क्रतौ २० ज्ञेयासप्ताश्वषड्भिर्मरभनययुताश्लोगः स्ववदना १४९ हीरजोगलोभवेद्दृढदशनलक्षणेनवृत्तनाम १५० ख्यातापूर्वैः स्ववंशायादिनरभनास्तद्वयंगागुरुश्च १५१ प्रक्रतौ २१ स्रग्नेर्यानांत्रयेणत्रिमुनियतियुतास्रग्धराकीर्तितेयं १५२ भवतिनजोहिसिद्धिरितिभाजजजायादिरोभवेद्दृ १५३ आक्रतौ २२ स्त्रीनरनागवार्थैर्गुरुर्दिगर्कविरमंहिभद्रिकमिदं १५४ लालित्यंभुजगेंद्रभाषितमेतच्चेन्मसज स्थभनगुरुभिः १५५ सजतानस्त्रोरंगैः फणितुरगहयैः स्यान्महास्रग्धरारव्या १५६ विक्रतौ २३ यदिहनजौ भनौभभलगास्तदाश्वललितंहरार्कयतिमत १५७ मत्ताक्रीडंभोनौनोन्लोगितिभवतिवस्वक्षशरदशयतियुतं १५८ संस्कृतौ २४ मृतमुनिनैर्यतिरिहभतनास्त्रीभनयाश्वयदिभवतितन्वी १५९ अभिक्रतौ २५ क्रौंचपदाम्रौ म्भौननननागाविषुशरवस्कमुनिविरतिरिहभवेत १६० क्रौंचपदाम्रौम्भौनचतुष्कगयुतमिषुद्विषवस्कमुनिविरतिः क्वचित्पाठः॥ उक्रतौ॥ २६ वस्वीशाश्वैछंदोपतंमभतनयुगनरसलगैर्मुजंगविजृंभितं १६१ मोनाःषड्गगागि तियदिनवरसरसशरयतियुतमपवाहाख्यम् १६२ इतिउक्तादिषट्विंशतिभेदाः॥ ॥यदिहनयुगलंततःस रेफास्तदाचंदवृष्टिप्रयातोभवेद्दंडकः ९ प्रतिचरणविवृद्धरेफास्फुरर्णार्णवव्यालजीमूतलीलाकरोद्दामशो

भत्तत्वात्एकेनैवपादेनलक्षितोयं १ प्रतिदंडकंचरणेषुविवृद्धैःरगणैरर्णादयोदंडकासंज्ञेयाः अत्रकाश्चित् चंदवृष्टिप्र यातारव्योदंडकोनगणहयात् रगणैः सप्तसंख्यैः स्यादर्णस्त्वष्टभिरुच्यते १ अर्णवोनवभिर्ज्ञेयोव्यालस्तदशभिर्भवेत् जीमूतएकादशभिः सूर्यैर्लीलाकरोभवेत् २ त्रयोदशभिरुद्दामः शंखनामाततः स्मृतः सचतुर्दशभिर्ज्ञेयस्ततःपंच दशादिभिः ३ आरामाद्याश्चविज्ञेयादंडकारर्णभिर्युताः आद्यद्वयोदाहरणेष्वंघ्रिमूलेप्रदर्शिते ४ २

प्रचितकवृत्तिसमभिधानामत्रस्यतिविग्रहः॥ उदाहरणंत्वेतदेव येरित्यन्येषामपिगणानामुपलक्षणं कविप्रयोगात्तत्रघटितानामपिदं
ण्डकानामिष्टत्वात् अत्रचंडवृष्ट्यादाविवगणवृत्त्यादंडकभेदाज्ञेया अनुक्तनाम्नांदंडकानांप्रचितकवृत्त्येवसंज्ञाज्ञेया तदुक्तंसूत्रकारेण
शेषःप्रचितकमिति ३ अर्धसमत्वादर्धमुदाहृतं १ नाम्नाविपरीतारब्धानकीभवेदित्यर्थः अपरवक्त्रंवेतालीयंत्वतिरिच्यते

स्वादयः २ प्रचितकसमभिधोर्धारधीभिः स्मृतोदंडकाख्यवृत्तैरेः सप्तभिर्यैः ३ इतिश्रीवृत्तरत्नाकरास्येछंदसिसमवृत्ताभिधानो
नामतृतीयोध्यायः॥ ॥विषमेयदिसोमलगादले० भोयुजिभाद्गुरुकाउपचित्रं १ भत्रयमोजगतंगुरुणीचेद्वाजिनजोन्ययुतोद्रु
तमध्या २ सयुगात्सगुरुर्विषमेचेद्वाविहवेगवतीयुजिभाद्गौ ३ ओजेतपरोजरोगुरुश्चेल्लसोगौग्भद्रविराड्भवेदनोजे ४ अ
समेसजौसगुरुयुक्तोकेतुमतीसगेभरनगाद्गः ५ आख्यानकीतोजगुद्गओजे० जतावनोजेजगुरुगुरुश्चेत् ६ जतौजगोगोविषि
षमसमेस्वाक्षोजेभागण्वीविपरीतपूर्वा ७ सयुगात्सलघूविषमेगुरुर्युजिनभौचभरौहरिणप्लुता ८ अयुजिननरलागुरुःसमेत
दपरवक्त्रमिदंनजौजरौ ९ विषमेऽर्कदिसौजगौसमेस्भरलागीपरवक्त्रमीरितं १० अयुजिनयुगरेफतोयकारोयुजिवनजौजरगाश्च
पुष्पिताग्रा ११ तथाद्गुः॥ वदंत्यपरवक्त्राख्यंवेतालीयंविपश्चितः पुष्पिताग्राभिधंकेचिदापछंदसिकंतथा १२ स्यादयुग्म
करजौरजौसमेतुजरौजरौगुरुर्यैवात्यरामतीयं १३ विषमेससजाःपदेगुरुश्चेत्समायेनतुमालभारणीयं १४ इतिश्रीवृत्तरत्नाक
राख्येछंदसिअर्धसमवृत्ताभिधानोनामचतुर्थोध्यायः॥ मुखपादोष्टभिर्वर्ण० परेस्युर्मकरालयैः क्रमाद्वृद्धाः सततंयस्यांविचि
त्रैः पादैः संपन्नसौंदर्यं० तदभिद्रुतममलधीभिःपदचतुरूर्ध्वाभिधंवृत्तं १ प्रथममुदितवृत्ते० विरचितविषमस्वरणभाजि गुरुयुगल
कनिधनइहकलितआद्या० विधृतरुचिरपदवितातियातिरितिभवतिपीडः २

पुष्पिताग्राच भोपछंदसिकान्यातिरिच्यतइत्यर्थः ५
आद्यकलितःपीडः आपीडोभवतीत्यर्थः विरचितायांविषमस्थविषमवृत्तस्यपदचतुरूर्ध्वाभिधस्यचरणाः॥ तान्भजतीतिभाजि विधृता ७
रुचिरपदवितत्याख्यातियैर्यनसः इहयद्यपिपदचतुरूर्ध्वान्याधिकावर्णानथाप्यंतिमवर्णयुगलमवश्यंप्रतिचरणंगुरुभात्यमन्येचसर्ववे
र्णालघवस्त्वेतिनियमः पदचतुरूर्ध्वेतुनगुरुलघूनियमइतिततोस्यविशेषः २

91/193

यदिआपीडस्थेवप्रथमंतुर्यनामप्रथमपादः द्वितीयचरणाश्रितंलक्ष्मश्रयति अथचवृतस्तुर्यनामद्वितीयःपादः प्रथमचरणाश्रितंलक्ष्मश्रय
ति तृतीयचतुर्थचरणौतुआपीडस्थेवतदाकालिकानामवृत्तंभवति अस्यामंजरीतिनामेतिसूत्रकारः ३ यदाआपीडस्थेवप्रथमः पादः
तृतीयस्थानेतृतीयश्चद्वितीयस्थानेद्वितीयश्चप्रथमस्थानेचतुर्थश्चयथास्थितएवभवतितदासालवली चतुर्ष्वपिपादेषु अंतिमोद्वौवर्णौ

प्रथममितरचरणसमुत्थंश्रयतिजगतिलक्ष्म कृतरदितरजनितमपियदिचतुर्थ० चरणयुगलकमविकृतमपरमितिकलिकासा ३
द्विगुरुयुतसकलचरणांता० मुखचरणरचितं मनुभवतितृतीयः चरणवद्वद्विलक्ष्मप्रकृतमपरमखिलमपियदिभवतिलवलीसा ४
प्रथमनपिबसतियदितुर्यचरमचरणपदमवसितिगुरुयुग्मं निखिलमपरमुपरितनसममिहललितपादत्रितयममृतधारा ५ इति
पञ्चचतुरूर्ध्वप्रकरणं॥ ॥सजसमादिमेसलघुकोचनसजगुरुकाअथोदिता ख्यधिगतमनजलागयुताःसजसाजगोचरणमिकतः
पदेत् १ चरणत्रयंभजतिलक्ष्म० यदिसकलमुदितागतं नोभगोभवतिसोरभकं० चरणेयदीहभवतस्तृतीयके २ नयुगंसकार
युगलंच० भजतिचरणंतृतीयकं तदुदितमुरुमतिभिर्ललितं० यदिशेषमस्यरवलुपूर्वतुल्यकं ३ इत्युद्गतात्प्रकरणं॥ ॥
स्त्रीजौगोप्रथमांघ्रिरेकतः पृथगन्यत्त्रितयंसनजगरास्तथाननोसः विनपारकलितत्रयो० प्रचुपितमिदमुदितमुपस्थितपूर्वं
१ नोपादेथतृतीयकेसनोमसयुक्तो० प्रथमांघ्रिकृतयतिप्रवर्द्धमानं त्रितयमपरमपिपूर्वमदृशमिहभवति० प्रततमसौमिरि
तिगदितंखलुवृत्तं २ अस्मिन्नेवतृतीयकेयदातत्ररायः स्युः० प्रथमेवविरतिरार्षभंब्रुवंति तच्छ्रुद्विट्पुरस्थितंत्रितयमपर
मपियद्विपूर्वसमंस्यात् ३ इत्युपस्थितप्रचुपितप्रकरणं॥ विषमाक्षरपादंवापादैरसमंदशधर्मवत् यछंदोनाकमत्रगाथे

गुरुरेवअन्येतुलघवएवेतिनियमः ४ अयमर्थः अक्षरधारायांचतुर्थःपाद्योष्टाक्षरः तृतीयःविंशत्यक्षरः द्वितीयःषो
डशाक्षरः प्रथमश्चद्वादशाक्षरोभवति एकतःप्रथमपादतःअन्यत्पादत्रितयंपृथक् अन्यप्रकारेणपठेत्तदेवस्यष्ट
यति द्वितीयपादेसनजरगाः तृतीयपादेश्रुद्विराट्पुरःस्थितं आर्षभं श्रुद्विराडार्षभंनामवृत्तंभवतीत्यर्थः
२

अत्रशास्त्रेयत्तछंदःनोक्तंतद्ग्राह्यामवति तदेवप्रपंचयति विषमाणिविसदृशसंख्यायुक्तानिअक्षराणियेषुतादृशाःपादायस्मिन्तत् अथवापादैः चतुःसंख्याकपादैः श्रीप्रभृतिभिः विसदृशंत्रिपंचयशादिसंख्याकपादैर्विशिष्टमित्यर्थः विषमाक्षरपादोदाहरणंलक्षणमेव विसदृशपादोदाहरणं तदर्शयतिदशधर्मवादिति दशधर्मशब्दविशिष्टंभारतस्यवाक्यं

तितत्करभिःप्रोक्तं १ दशधर्मंनजानंतिधृतराष्ट्रनिबोधतान् मत्तःप्रमत्तउन्मत्तःशांतःक्रुद्धोबुभुक्षितः त्वरमाणश्चभीरुश्चलुब्धःकामीचतेदश २ इतिश्रीवृत्तरत्नाकरव्येछंदसिपंचमोध्यायः॥ ॥पादैसर्वगुरावाद्यात्क्षुघ्न्यस्यगुरारधः यथोपरितथाशेषभूयंकुर्यादमुंविधिं १ ऊनेदद्याद्गुरूनेवयावत्सर्वलघुर्भवेत् प्रस्तारोयं समाख्यातश्छंदोविचितिवेदिभिः २ इतिप्रस्तारः॥ नष्टस्योमवेदंकस्तस्याद्र्द्धेसमेचलः विषमेचैकसाधयतस्यार्द्धेगुरुर्भवेत् १ इतिनष्टं उद्दिष्टद्विगुणानाद्याद्युपर्यंकान्समालिखेत् लघुस्थास्तत्रवेचांकास्तेःसंकेमिश्रितेर्भवेत् १ इत्युद्दिष्टम्॥ वर्णान्वृत्तभवान्मेकानोत्तराधर्यतःस्थितान् एकादिक्रमशश्चैतानुपर्युपरिनिक्षिपेत् १ उपांत्यतोनिवर्तेतत्यजन्नेकैकमूर्ध्वतः उपर्याद्याद्गुरोरेवमेकाद्यादिलगक्रिया २

गाथेत्यर्थः तदेवलिखतिदशधर्मंनजानंतीति मत्तःसुरादिपानात् प्रमत्तोनवधानात् भूताद्यावेशात् स्वप्नमन्यत्र २ पादैसर्वेति॥ अक्षरपादस्यमध्यालंदसःकातिविधानिसमवृत्तानिभवंति॥ इतिज्ञिज्ञासायामयंप्रकारः॥ प्रथमंसर्वगुरुः पादोलेखनीयः॥ तदधःप्रथमगुरोरधःलघुः द्वित्रेचद्वौगुरू पुनः द्वितीयगुरावाद्यत्वात्तदधःलघुः तदग्रेचगुरुः तत्पृष्ठे तश्चैकेनदद्याद्गुरूनेवेतिवचनाद्गुरुः एवंयावत्सर्वलघुःपादोभवेत्तावत्करणीयः एवंअक्षरपादस्य अष्टौ॥ ७ ॥

नष्टस्येति॥ चतुरक्षरप्रस्तारेचतुर्थवृत्तंनष्टंतत्कीदृक्सिद्धं इतिप्रश्नेयंप्रकारः॥ चतुर्थस्यसमांकत्वादादौलघुर्लेखयः॥ ततश्चतुर्णांअर्धंकृतेद्वौलघ्वोतयोरपिसमत्वात्पुनर्लघुः द्वयोरधेरेकोलघ्वः तस्यविषमत्वात्गुरुः ३ एकःएकेनयुक्तः कृतः तदाद्यौजातौतयोरर्धेरेकोलघ्वः तस्यविषमत्वाद्गुरुः एकत्वेत्थंवृत्तं ॥ ३३ ॥ तथातृतीयोभेदः कीदृगितिपृष्टे

ऽ	ऽ	ऽ	स
ऽ	।ऽ	।ऽ	ए
।ऽ	।ऽ	।ऽ	द्वि
ऽ	ऽ	ऽ	स

ततश्चअधस्तनंएकांकं ननुत्र्यंकंतदुपरिस्थेकांके वृत्तांतदधोभूततृतीयावृत्तं णिद्विगुरूणित्रीणि॥सर्वलघुचैकं॥एवमन्यत्रज्ञेयं॥

93/1935

तृतीयस्यविषमत्वाद्गुरुः अन्यस्यततः सैकस्यतर्ध्यर्धद्वयंतस्यसमत्वाल्लघुः न्यत्थततस्तस्यार्धस्यैकरूपत्वेनविषमत्वाद्गुरुः न्यस्यपुनःसैकस्यैकस्यार्धस्यैकस्यविषमत्वाद्गुरुः एवंचैत्थंवृत्तारव्या॥ यावद्यत्तवृत्ताक्षरसंपूर्णंस्यात्तावदर्धद्वित्रिःकुर्यात् इत्थंसर्वत्रोह्यं॥ छंदिष्टमिति॥ अक्षरप्रस्तारेमध्यगुरुः॥ ३। वृत्तंकथितंभवतीति प्रश्नेयंप्रकारः॥ इतिवृत्तंप्रस्तार्यप्रथमाक्षरोपरिएकांकः द्वितीयाक्षरोपरिद्व्यंकः तृतीयाक्षरोपरिचतुरंकः लेखनीयः तत्रोपरिलघ्वंकेनसहितेनकचतुरंकोसंयोजितोचेत्संभवंतितेचैकेनमिश्रिताःषड्भवंतितथाचेदंषष्ठंवृत्तमितिकथनीयं एवमन्यत्रापूह्यं॥

इतिलगक्रिया॥ लगक्रियांकसंदोहभवेत्संख्याविमिश्रितं॥ उद्दिष्टांकसमाहारःसैकोवाज्ञनयेदिमां १ इतिसंख्या॥ संख्येवद्विगुणेकोनासङ्गिरध्वाप्रकीर्तितः वृत्तस्यांगुलिकिंव्याप्तिमधःकुर्यात्तथांगुलं १ इत्यध्वा॥ प्रस्तारोनष्टमुद्दिष्टमेकाद्यालगक्रिया संख्यांचैवाध्वयोगश्चषडेतेप्रत्ययास्मृताः १ वंशोभूत्कश्यपस्यप्रकटगुणगणःशैवसिद्धांतवेत्ताविप्रःपिंगेकनामाविमलतरमतिर्वेदतत्त्वाब्धिबोधेः॥ केदारस्तस्यसूनुःशिवचरणयुगाराधनैकाग्रचित्तश्छंदस्तेनाभिरामंप्रविरचितमिदंवृत्तरत्नाकराख्यं॥ २॥ इतिश्रीभट्टकेदारविरचितेवृत्तरत्नाकराख्येछंदसिषट्प्रत्ययोनामषष्ठोध्यायः॥

संख्येवेतिचतुरक्षरप्रस्तारस्यषोडशवृत्तानिभवंतितेचषोडशद्विगुणिताःसंतः द्वात्रिंशद्भवंतितेचैकोनाएकत्रिंशद्भवंतित
थाचैकत्रिंश ३१ गुलमितायांभुविचतुरक्षरप्र
स्तारोजायते ॥ लगक्रियायांसिद्धाअंकाएकचच
षोडशवृत्तानिसंतीतिज्ञेयं ॥ तेनपंचदशांघ्रांतिते
चैकेनस
स्तारकृतिवृत्तानिभवंति
द्वतिजिज्ञासायातु षट्चतुरंककूपाःएषांपरस्प
रंमिश्रेणषोडशसिध्यंतिथा १२४८ अथवाद्वि
ताः॥ उद्दिष्टांकाएकद्विचतुरष्टकूपाःएषांपरस्प
रंमेलसंतः षोडश १६ शभवंतिइतिषोडशवृत्तानि
ज्ञेयानि ॥

१	१	१	१	स
१	२	४	४	ह
१	३	६	६	द्वि
१	२	३	३	त्रि
१	१	१	१	स

श्रीगणेशायनमः ग्रंथांतरेचोक्तः यथा सममात्रंगुरुपादंविन्यस्याद्यादुरोरधस्तन्यदत्वालघंययोर्धशेषन्यूनेन्यसेदपेक्षातः१

लाभ्यांवाक्रमयंव्यासंशिवाभ्यामिवनिष्टभं तद्वेदाःस्युर्मादिगणाःक्षित्याद्यादेवर्तयः १ मात्रिगुरुर्मुखलघ्वयकारीरोलघ्वम
यद्दृतगुरुःसः ॥तोत्यलघ्वःखलुमध्यगुरुर्नोभोमुरवगुस्त्रिलघ्वश्चनकारः २ क्ष्मावन्यनिलरवर्कैंदुनाकामादेःक्रमा
त्॥ श्रीहृद्विनाशपथ्यश्रीरुद्धीत्यर्थिःफलानिच ३ दुष्टारसतज्ञायस्माद्दनादीनांविनाशकाः॥ काव्यस्यादौनदात
स्मादतिछंदोविदोजगुः ४ यदादेवदशादादौगणोदुष्टफलोभवेत्॥तदातद्दोषशांत्यर्थंशोध्यःस्यादपरोगणः ५ मनोमि
त्रभयोभृत्याउदासीनोजतोस्मृतो॥ रसावरीनाचसंज्ञोद्दोद्दावेतोमनीषिभिः ६ मित्रोदासीनभृत्येभ्योमित्रभृत्योश्चभोम
तौ॥ अन्येभ्यस्तरेनेष्टादत्यल्पंपरिशेषतः ७ भद्रभ्रजाष्टरुद्रणास्त्रफबामनरालवो॥पद्मलाःसंयुताश्चान्येकाव्या
दौनश्चभामताः ८ अक्षरेयदिशंकेतुनायकोभूमिमृच्छति ९ मित्रान्मित्रादयःस्युर्यदिधनमुदयंशत्रुन्यकंबंधपी
डांभृत्यान्मित्रादयश्चेद्वृतिमधिकगुणंहानिशोकौकुर्युः॥ औदासीनाच्चमित्रादयद्दकुक्रखंधैर्यमीर्ष्यांस्ववैरंशत्रो
र्मित्रादयश्चेद्भुममधिगृहिणीनांशमाधिंविनाशं १ मित्रान्मित्रंविधत्तेप्रचुरधनमथोमित्रतोभृत्यसंज्ञःस्थैर्यंमित्रा
दुदासीनकिमपिचफलंमित्रतःशत्रुसंज्ञाःवंधोःपीडामथोस्याद्यदिखलनियतंभृत्यतोमित्रसंज्ञः॥ सर्वंकार्यंचभृत्या
दुत्तगणद्वदचेदायतिंसर्वलोके १ अथमात्राप्रस्तारः॥ ॥तत्रप्रथमंपंक्तौस्याद्गुरुपादस्तपूर्ववत्॥ द्वितीयपं
क्तौप्रथमादधोलिखेत्रोलघ्वंगुरोः २ अथोपरितधाशेषमूनस्थानेलघ्वंन्यसेत्॥ तृतीयादिषुपंक्तिष्वप्येवमेवगुरोर
धः २ लघ्वंन्यस्याविशिष्टंतुपूर्वसरिकीर्तितं॥ न्यूनेमात्रात्रयंदेयंतस्मिन्नाद्यगुरुद्वयोः॥ ३ कलयोःस्यात्ततःपूर्वं
लघ्वर्दयोभवेत्ततः॥ चतुर्थपंक्तावप्येवंपंचम्यांतुगुरोरधः ४ लघद्वयंलिखेत्पूर्ववविशिष्टंतूपरिवद्भवेत् ॥एवंसर्ववि

ज्ञेयः कलाप्रस्तारउत्तमः॥ ५ तेनद्विगुरुपादस्यपंचभेदाभवंत्यमी॥सर्वांतमध्यादिगुरुचतुर्लघ्वगणाःस्मृताः॥ ६॥अत्रायंप्र
कारः॥ पूर्वंप्रथमपंक्तौसर्वगुरुः ऽऽ पादोलेखनीयः तदधः द्वितीयपंक्तौप्रथमपंक्तिस्थप्रथमगुरोरधः लघुंविलिख्यन्यस्त
लघोरग्रेगुरुर्लेखनीयः न्यस्तलघोः पृष्ठतश्चलघुर्लेखनीयः यथा ॥ ९॥तदधः तृतीयपंक्तौद्वितीयपंक्तिस्थांत्यंगुरुं
रवप्राथम्यात्तदधः लघुर्लेखनीयः॥ पृष्ठतश्चमात्रात्रयंदेयंतत्रापि स्वचीकयहन्यायेनप्रथमंलघुदेयः ततोः गुरुः
यथा॥ ३॥ऊनस्थानेएकमात्रापेक्षायांलघुर्देयः द्विमात्रापेक्षायांद्व्योर्मात्रयोः एकोगुरुरेवदेयः तिस्रृणांमात्राणां
अपेक्षायांपूर्वमेकोलघुः द्वितीयश्चगुरुर्देयः ॥ एवमत्रापिकरणीयत्वात् ॥इतिमात्राप्रस्तारः॥ अथमात्रान
ष्टं॥ संख्यांयेहपृथग्मात्रास्तत्रचांकान्समालिखेत्॥ एवद्व्यंकतृतीयांकानाद्यमात्रात्रयेक्रमात् ॥९॥ ततःपू
र्वद्व्योर्मिश्रानंत्येपृष्ठांकलोकनं॥ पूर्वपूर्वतरस्थापिलोपः संभवतोभवेत्॥ २॥ यस्मिंयस्मिंभवेल्लोपस्तदधो
ज्ञांतगुरुर्द्वितीयोभेदः सिद्धः यथा॥ एवमन्यत्रापूर्त्त्यं॥ गुरुताभवेत् ॥परयामात्रयेस्थंतन्मात्रानष्टंवदेत्कधीः
॥इतिमात्रानष्टं॥ ६ उद्दिष्टेनष्टवन्न स्यान्मात्राणांस्थापनंपृथक्॥ उद्दिष्टप्रस्तारंवृत्तलिखित्वोपरिविन्यसेत् ॥१॥
कलयोरद्ययोरेकद्व्यंकावन्यकलासतु॥पूर्वपूर्वद्व्योर्मिश्रानंकानधगुरूपरि॥ १॥ अंकंप्रथममात्रायाअपरस्यास्त्व
धोगुरोः॥ असंकरार्थमंकानामेकीकृत्यगुरूर्ध्वगान्॥ ३॥अंकानथनदेयंत्वेशिष्टंदृष्टमुच्यते ॥४॥ अत्रायंप्र
कारः॥ ५॥ कतिथंवृत्तमितिप्रश्ने॥ इतिवृत्तप्रस्तार्यप्रथमकलोपरिएकांकोदेयः गुरोरुपरितुद्वितीयकलायाः द्व्यं
कः तृतीयकलायास्त्र्यंकः गुरोरधोदेयः चतुर्थकस्यायांपंचांकः गुरोरुपरिस्थः द्व्यंकः पंचांकादपनेयः अवशिष्टास्त्रयः
तथाचतृतीयमिदंवृत्तं॥ इतिकथनीयं॥ एवमन्यत्रापीत्थं॥ इतिमात्रोद्दिष्टं॥

अत्रायंप्रकारः॥ चतुष्कलप्रस्तारेद्वितीयोभेदः कीदृगस्तीतिपृष्टेचतस्रः कलाः पृथक्स्थाप्याः यथा ।।।। वामप्रथमकलामेकांकोदेयः द्वितीयायांद्व्यंकएकां

कद्व्यंकमेकीकृत्यजातः त्र्यंकः तृतीयायांद्व्यंकत्र्यंकावेकीकृत्यजातः पंचांकः चतुर्थ्यांपृष्टद्व्यंकमंतिमकलोपर्यंकेपंचक
मेलोपयेत्॥तत्रावशिष्टेत्रिद्व्येपूर्वतनंत्र्यंकंलोपयेत्॥एवंचतृतीयकलोपर्यंकस्यलुप्तत्वात्तदधस्तनमात्रायाश्चतुर्थ्यासह
गुरुत्वंभवति॥एवंचातगुरुर्द्वितीयाभेदः सिद्धः यथा॥ ३॥एवमन्यत्रापूर्त्त्यं॥

द्व्यक्षर	प्रस्तारः	षण्मात्रा	अष्टमात्रा		नष्टवर्णवृत्तंपंचमंच चतुरक्षरप्रस्तारस्य	उद्दिष्टंवर्णवृत्तंषष्ठं चतुरक्षरप्रस्तारस्य
ऽऽ	ऽऽऽ	ऽऽऽ	ऽऽऽऽ		ऽऽ।ऽ	४२ ४८
।ऽ	।ऽऽ	।।ऽऽ	।।ऽऽ		मात्रानष्टंअष्टमात्रा	।ऽ।ऽ
ऽ।	ऽ।ऽ	।ऽऽ	।ऽ।ऽ		प्रस्तारस्य.	लगक्रियाचतुरक्षस्य
।।	।।ऽ	ऽ।ऽ	ऽ।ऽ।		सप्तमंवृत्तं	प्रस्तारस्य
चतुरक्षर	ऽऽ	।।।	।।।ऽ		४३ ४२ ४१	
ऽऽऽऽ	।ऽ	ऽ।।	ऽ।।।		ऽ। ऽ। ऽ	
।ऽऽऽ	ऽ।	।ऽ।	।ऽ।।		२ ८ ३४	
ऽ।ऽऽ	।।	ऽ।।	ऽ।।।		दशम	
।।ऽऽ	चतुर्मात्राप्रस्तार	।।।	।।।।		४ २ १ । ।ऽ	
ऽऽ।	ऽऽ	।ऽ।।	।ऽ।।।		।।ऽ	
।ऽ।	।ऽ	ऽ।।।	ऽ।।।।		५ ३४	
ऽ।।	ऽ।	।।।।	।।।।।			
।।।	।।					
ऽऽऽ।	ऽ		ऽऽऽ।	।ऽऽ।		
।ऽऽ।			।ऽऽ।	ऽ।ऽ।		
ऽ।ऽ।			ऽ।ऽ।	।।ऽ।		
।।ऽ।			।।ऽ।	ऽऽ।।		
ऽऽ।।			ऽऽ।।	।ऽ।।		
।ऽ।।			।ऽ।।	ऽ।।।		
ऽ।।।			ऽ।।।	।।।।		
।।।।			।।।।			

१	०	०	०	स
१	१	०	०	ए
१	२	६	७	द्वि
१	२	३	४	त्रि
१	१	१	१	स

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017


वृत्तरत्नाकरःसमाप्तः पत्रं १२